श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ काञ्चनपद्धतिः द्वाविंशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ काञ्चनपद्धतिः द्वाविंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

कल्याणप्रकृतिं वन्दे भजन्तीं काञ्चनश्रियम्।
पदार्हां पादुकां शौरेः पद एव निवेशिताम्॥ **22.1** ॥

मधुजित्तनुकान्तितस्कराणां
जलदानामभयं विधातुकामा।
चपलेव तदङ्घ्रिमाश्रयन्ती
भवती काञ्चनपादुके ! विभाति॥ **22.2** ॥

निकषीकृतरम्यकृष्णरत्ना
भवती काञ्चनसम्पदं व्यनक्ति।
परिपुष्यति पादुके ! यदीक्षा
सहसा नः समलोष्टकाञ्चनत्वम्॥ **22.3** ॥

सुरभिर्निगमैः समग्रकामा
कनकोत्कर्षवती पदावनि ! त्वम्।
दिशसि प्रतिपन्नमाधवश्रीः
अनिशोन्निद्रमशोकवैभवं नः॥ **22.4** ॥

सति वर्णगुणे सुवर्णजातेः
जगति ख्यातमसौरभादवर्णम्।

श्रुतिसौरभशालिना स्वहेम्ना
    भवती शौरिपदावनि ! व्युदास्थत् ॥ **22.5** ॥

प्रतिपन्नमयूरकण्ठधाम्ना
    परिशुद्धेन पदावनि ! स्वकेन।
कमलास्तनभूषणोचितं तत्
    भवती रत्नमलङ्करोति हेम्ना ॥ **22.6** ॥

कान्त्या परं पुरुषमाप्रणखात् सुवर्णं
    कर्तुं क्षमा त्वमसि काञ्चनपादरक्षे !।
अन्यादृशीं दिशसि या विनतस्य दूरात्
    आरग्वधस्तबकसम्पदमिन्दुमौळेः ॥ **22.7** ॥

चन्द्राकृतिः कथमकल्पयथास्तदानीं
    वैमानिकप्रणयिनीवदनाम्बुजानाम्।
विक्रान्तिकालविततेन निजेन धाम्ना
    बालातपं बलिविमर्दनपादुके ! त्वम् ॥ **22.8** ॥

लेभे तदाप्रभृति नूनमियं भवत्याः
    कान्त्या कवेरतनया कनकापगात्वम्।
यावन्मुकुन्दपदहेमपदावनि ! त्वं
    पुण्यं विभूषितवती पुळिनं तदीयम् ॥ **22.9** ॥

चित्रं सरोजनिलयासहितस्य शौरेः
    वासोचितानि चरणावनि ! संविधित्सोः।
सद्यो विकासमुपयान्ति समाधिभाजां
    चन्द्रातपेन तव मानसपङ्कजानि ॥ **22.10** ॥

त्वय्येव पादमधिरोप्य नवं प्रवाहं
    नाथे पदावनि ! निशामयितुं प्रवृत्ते।

आत्मीयकाञ्चनरुचा भवती विधत्ते
    हेमारविन्दभरितामिव हेमसिन्धुम् ॥ **22.11** ॥

विहरति पुळिनेषु त्वत्सखे रङ्गनाथे
    कनकसरिदियं ते पादुके ! हेमधाम्ना।
वहति सलिलकेळीस्रस्तचोळावरोध -
    स्तनकलशहरिद्रापङ्कपिङ्गामवस्थाम् ॥ **22.12** ॥

सुरभिनिगमगन्धा सौम्यपद्माकरस्था
    कनककमलिनीव प्रेक्ष्यसे पादुके ! त्वम्।
भ्रमर इव सदा त्वां प्राप्तनानाविहारः
    शतमखमणिनीलः सेवते शार्ङ्गधन्वा ॥ **22.13** ॥

कनकरुचिरवर्णा पादुके ! सह्यसिन्धुः
    श्रियमिव महनीयां सिन्धुराजस्य पत्नी।
स्वयमिह सविधस्था सौम्यजामातृयुक्ताम्
    उपचरति रसेन त्वामपत्याभिमानात् ॥ **22.14** ॥

अनुकलमुपजीव्या दृश्यसे निर्जराणां
    त्रिपुरमथनमौळौ शेखरत्वं दधासि।
प्रतिपदमधिगम्य प्राप्तशृङ्गासि शौरेः
    तदपि चरणरक्षे ! पूर्णचन्द्राकृतिस्त्वम् ॥ **22.15** ॥

कनकमपि तृणं ये मन्वते वीतरागाः
    तृणमपि कनकं ते जानते त्वत्प्रकाशैः।
मधुरिपुपदरक्षे ! यत् त्वदर्थोपनीतान्
    परिणमयसि हैमान् देवि ! दूर्वाङ्कुरादीन् ॥ **22.16** ॥

विशुद्धिमधिगच्छति ज्वलनसङ्गमात् काञ्चनं
    विदन्ति च जगन्ति तन्न खलु तद्विपर्यस्यति।

कथं कनकपादुके ! कमललोचने साक्षिणि
त्वयैव परिशुद्धता हुतभुजोऽपि जाघट्यते ॥ **22.17** ॥

तारासङ्गप्रथितविभवां चारुजाम्बूनदाभां
त्वामारूढस्त्रिदशमहितां पादुके ! रङ्गनाथः ।
सञ्चारिण्यां सुरशिखरिणस्तस्थुषा मेखलायां
धत्ते मत्तद्विरदपतिना साम्यकक्ष्यां समीक्ष्याम् ॥ **22.18** ॥

कनकरुचिरा काव्याख्याता शनैश्चरणोचिता
श्रितगुरुबुधा भास्वद्रूपा द्विजाधिपसेविता ।
विहितविभवा नित्यं विष्णोः पदे मणिपादुके !
त्वमसि महती विश्वेषां नः शुभा ग्रहमण्डली ॥ **22.19** ॥

प्रज्वलितपञ्चहेतिः हिरण्मयीं त्वां हिरण्यविलयार्हः ।
आवहतु जातवेदाः श्रियमिव नः पादुके ! नित्यम् ॥ **22.20** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे काञ्चनपद्धतिः द्वाविंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥